असुन् ।) मांसप्रभवधातुविशेषः । तत्पर्य्यायः । वपा २ वसा ३ । इत्यमरः ।२।६।६४। मेदः ४ । अकारान्त इति भरतः । अस्य गुणाः । वातनाशित्वम् । बलपित्तकफदाहत्वञ्च । इति राजवल्लभः । अथ मेदसः स्वरूपमाह ।
"यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते ।
तदतीव गुरु स्निग्धं बलकार्य्यतिबृंहणम् ।"
अथ मेदसः स्थानमाह ।
"मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ।"
इति भावप्रकाशः ।
रोगविशेषः । तत्र मेदसो विप्रकृष्टं निदानमाह ।
"अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः ।
मधुरोऽन्नरसः प्रायः स्नेहान्मेदो विवर्द्धयेत् ।"
अन्नरसः आमद्रवः । तथा च सुश्रुतः ।
आमद्रवान्नरसो मधुरश्च भवतीति । मेदसोऽतिप्रवृद्धौ वैगुण्यमाह ।
"मेदसावृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः ।
मेदस्तु चीयते तस्मादशक्तः सर्व्वकर्म्मसु ।"
अन्ये धातवः अस्थ्यादयः शुक्रान्ताः । न पुष्यन्ति न पुष्टा भवन्ति । चीयते सञ्चितं भवति वर्द्धत इति यावत् । तस्मात् मेदस्वी सर्व्वकर्म्मसु अशक्तः स्यात् । मेदसः सौकुमार्य्यात् । अपरानपि दोषानाह ।
"क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः ।
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः ।
मेदसः स्नेहदौर्गन्ध्याच्छायन्ते जन्तवो नरः ।"
क्रथनं उच्छ्वासावरोधः । कण्ठेन घुर्घुर इत्यन्ये । जन्तवः क्रिमयः । मेदसः स्थानमाह ।
"मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ।"
मेदस्विनोऽपि वृद्धौ हेतुमाह ।
"मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः ।
चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि ।
तस्मात् शीघ्रं जरयत्याहारञ्चापि काङ्क्षति ।
विकारान् सोऽश्नुते घोरान् काश्चित् कालव्यतिक्रमात् ।"
सन्धुक्षयति प्रदीपयति । स मेदस्वी आहारं शीघ्रं जरयति पुनर्भोक्तुं काङ्क्षति स दीप्ताग्निः कालव्यतिक्रमात् भोजनकालातिक्रमात् । कांश्चिद्विकारान् वातपित्तकरान् घोरान् अश्नुते प्राप्नोति । एते वातपित्ते मेदसावरुद्धे विशेषादुपद्रवकरे इत्याह ।
"एतावुपद्रवकरौ विशेषात् पित्तमारुतौ ।
एतौ हि दहतः स्थूलं वनं दावानलो यथा ।"
एतौ पित्तमारुतौ मेदसा रुद्धमार्गत्वात् कोष्ठमध्ये प्रवृद्धौ सन्तौ विशेषादुपद्रवकरौ दहतः नाशयेताम् । मेदसोऽतिवृद्धेर्विनाशहेतुत्वमाह ।
"मेदस्यतीवसंवृद्धे सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ।"

विकारान् प्रमेहपिड़काज्वरभगन्दरविद्रधिवातरोगाणामन्यतमान् । अतिस्थूलतया वैगुण्यमाह ।
"अतिस्थूलेषु संदृष्टा विसर्पाः सभगन्दराः ।
ज्वरातीसारमेहार्शःश्लीपदा यविकादयः ।"
अतिस्थूलस्य लक्षणमाह ।
"मेदो मांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ।"
अयथोपचयोत्साहः न यथा उपचयो मांसोपचयः उत्साहो बलञ्च यस्य सः ।*।*। अथ मेदस्य चिकित्सा ।
"पुराणाः शालयो मुद्गाः कुलत्थोद्दालकोद्रवाः ।
लेखना वस्तयश्चापि सेव्या मेदस्विना सदा ।
श्रमचिन्ताव्यवायाध्वक्षौद्रजागरणप्रियः ।
हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनः ।
चारं वातारिपत्रस्य हिङ्गुयुक्तं पिबेन्नरः ।
सचितं भक्तमण्डेन मेदोवृद्धिनिवृत्तये ।
गुड़ूचीत्रिफलाक्वाथः पीतो मेदोहरः स्मृतः ।
गुड़ूचीत्रिफलाक्वाथस्तथा लौहरजोयुतम् ।
क्षौद्रेण त्रिफलाक्वाथः पीतो मेदोहरः परः ।
प्रातर्म्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।
उष्णमन्नस्य मण्डं वा पिबेत् कृशतनुर्भवेत् ।
चोषाग्नित्रिफलामुस्तविड़ङ्गैर्गुग्गुलुं समम् ।
खादेत् सर्व्वान् जयेद्रोगान्मेदःश्लेष्मामवातजान् ।
पिप्पली मधुना सेव्या मेदःकफविनाशिनी ।
धत्तूरपत्रस्वरसेन गाढ़-
सुद्वर्त्तनं स्थौल्यहरं प्रदिष्टम् ।
वासादलरसो लेपाच्छङ्खचूर्णेन संयुतः ।
विल्वपत्ररसो वापि देहदौर्गन्ध्यनाशनः ।
निम्बपत्रस्वरसः प्रचितकक्षादियोजितं जयति ।
दग्धहरिद्रोद्वर्त्तनमचिराच्चिरदेहदौर्गन्ध्यम् ।
शिरीषलामज्जकहेमलोध्रै-
स्त्वग्दोषसंस्वेदहरः प्रघर्षः ।
शरीरदौर्गन्ध्यहरः प्रदेहः
पत्राम्बुलोध्राभयचन्दनानाम् ।"
शिरीषस्यात्र पत्रं ग्राह्यं व्यवहारात् । लामज्जकं सुगन्धितृणविशेषस्तदभावे उशीरं ग्राह्यम् । हेम नागकेशरम् । अम्बु बालकम् । अभयं उशीरम् ।
"हरीतकीं तु संपिष्य देहमुद्वर्त्तनं नरः ।
पश्चात् स्नानं प्रकुर्व्वीत देहस्वेदोपशान्तये ।
वकुलस्य दलैः सम्यग्वारिणा परिपेषितैः ।
देहमुद्वर्त्तयेत् पश्चाद्धरीतक्या सुपिष्टया ।
भूय उद्वर्त्तनं कुर्य्यात् पश्चात् स्नानं समाचरेत् ।
प्रस्वेदान् मुच्यते शीघ्रं मेदोवृद्धिसमुद्भवात् ।"
इति मेदोऽधिकारः । इति भावप्रकाशः ।
(तथास्य विशेषः । यथा,—
"मेदः स्नेहस्वेदौ दृढ़त्वं पुष्टिमस्थ्नाञ्च ।"
अस्य क्षीणलक्षणं यथा,—
"मेदः क्षये शीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च ।" अस्यातिवृद्धिलक्षणं यथा,—

"मेदः स्निग्धाङ्गतामुदरपार्श्ववृद्धिं कासश्वासादीन् दौर्गन्ध्यञ्च ।"
"पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परम् ।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम् ।"
"चपयेद्वृंहयेच्चापि दोषधातुमलान् भिषक् ।
तावद्यावदरोगः स्यान्नरो रोगसमन्वितः ।"
इति सुश्रुते सूत्रस्थाने १५ अध्यायः ।
"तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानामुदरस्थमन्वस्थिषु च महत्सु च मज्जा भवति ।"
इति तत्रैव शारीरस्थाने ४ अध्याये ।)

मेदः, पुं, ( मेद्यति स्निह्यतीति । मिद् + अच । ) वपा । इति शब्दचन्द्रिका ।
"दृष्ट्वाकण्ठमिषरो मलभ्नो मेदकुण्डा ।"
इति भरतधृतशालिहोत्रः ।)
म्लेच्छजातिविशेषः । इति जटाधरः । अलम्बुषा । इति राजनिर्घण्टः । ( ऐरावतकुलजो नागविशेषः । यथा, महाभारते ।१।५७।११।
"विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ।")

मेदकः, पुं, ( मिद् + ण्वुल् । ) जगलः । इत्यमरः । २ । १० । ४२ । मेथा इति भाषा ।

मेदजः, पुं, ( मेदात् जायते इति । जन् + डः । ) भूमिजगुग्गुलुः । इति राजनिर्घण्टः । मेदोभवश्च ।

मेदःसारा, स्त्री, ( मेदः सारोऽस्याः । ) मेदा । इति राजनिर्घण्टः । ( विवृतिरस्या मेदाशब्दे द्रष्टव्या ।)

मेदस्कृत्, क्ली, ( मेदः करोतीति । मेदस् + कृ + क्विप् । ) मांसम् । इति हेमचन्द्रः ।

मेदा, स्त्री, ( मेदो अस्याः अस्तीति । मेद + अच् । टाप् । ) अष्टवर्गप्रसिद्धौषधिविशेषः । तत्पर्य्यायः । मेदोद्भवा २ जीवनी ३ श्रेष्ठा ४ मणिच्छिद्रा ५ विभावरी ६ । इति रत्नमाला । वसा ७ स्वल्पपर्णिका ८ मेदःसारा ९ स्नेहवती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेधा १४ द्रवा १५ साध्वी १६ शल्यदा १७ बहुरन्ध्रिका १८ पुरुषदन्तिका १९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहार्त्तिकाशराजयक्ष्मज्वरनाशित्वम् । वातदोषकारित्वञ्च । इति राजनिर्घण्टः । तस्य लक्षणं यथा,
"शुक्लकन्दो नखच्छेद्यो मेदो धातुमिव स्रवेत् ।
यः स मेदेति विज्ञेयो जिज्ञासातत्परैर्जनैः ।"
मेदामहामेदास्थाने शतावरी मूली । इति भावप्रकाशः । अस्या विवरणं महामेदाशब्दे द्रष्टव्यम् । (अनुकल्पोऽस्या यथा । "मेदाभावे चाश्वगन्धा ।" इति वैद्यकपरिभाषायाम् । )

मेदिनी, स्त्री, ( मेदोऽस्या अस्तीति । मेद + इनिः । ङीष् ।) मेदा । काश्मरी । इति राजनिर्घण्टः । पृथिवी । इत्यमरः । २ । १ । ३ । मेदो विद्यतेऽस्याः मेदिनी सान्तान्मेदःशब्दादिन् सलोपश्च निपात्यते इति परे । स्वमते मेदः समानार्थोऽदन्तो मेदशब्दोऽस्ति । दृष्ट्वाकण्-